भाषापरिच्छेदः कारिकावलीवा

१२२५

पत्राणि २०

॥ श्रीगणेशाय नमः ॥ नूतनजलधररुचये गोपवधूटीदुकूलचौरा
य कृष्णायनमस्तस्मै संसारमहीरुहस्यबीजाय १ द्रव्यंगुणास्तथा
कर्मसामान्यंसविशेषकं समवायस्तथाभावः पदार्थाःसप्तकीर्त्ति
ताः २ क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनोमनः द्रव्याण्यथगुणा
रूपंरसोगंधस्ततःपरं ३ स्पर्शसंख्यापरिमितिःपृथक्त्वंचततःपरं
संयोगश्चविभागश्चपरत्वंचापरत्वकं ४ बुद्धिःसुखंदुःखमिच्छाद्वेषो
यत्नोगुरुत्वकं द्रवत्वंस्नेहसंस्कारावदृष्टंशब्दएवच ५ उत्क्षेपणं
ततोपक्षेपणमाकुंचनंतथा प्रसारणंचगमनंकर्माण्येतानिपंच
च ६ भ्रमणंरेचनंस्पंदनोर्ध्वज्वलनमेवच तिर्यग्गमनमप्यत्रग
मनादेवलभ्यते ७ सामान्यंद्विविधंप्रोक्तंपरंचापरमेवच द्रव्या
दित्रिकवृत्तिस्तुसत्तापरतयोच्यते ८ परभिन्नातुयाजातिःसै
वापरतयोच्यते द्रव्यत्वादिकजातिस्तुपरापरतयोच्यते ९ व्या

पकत्वात्परापिस्यात् व्याप्यत्वादपरापि च अंत्यो नित्यद्रव्यवृत्तिर्वि
शेषः परिकीर्त्तितः १० घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु
जातेश्च संबंधः समवायः प्रकीर्त्तितः ११ अभावस्तु द्विधा संसर्गा
न्योन्याभावभेदतः प्रागभावस्तथा ध्वंसोप्यत्यंताभाव एव च १२
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते सप्तानामपि साधर्म्यं ज्ञेय
त्वादिकमुच्यते १३ द्रव्यादयः पंच भावा अनेके समवायिनः सत्ता
वंतस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः १४ सामान्यपरिहीनास्तु
सर्वे जात्यादयो मताः परिमांडल्यभिन्नानां कारणत्वमुदाहृतं १५ ण ५
अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता कारणत्वं भवेत्तस्य
त्रैविध्यं परिकीर्त्तितं १६ समवायिकारणत्वं ज्ञेयमथाप्यसम
वायि [redacted] एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वं
१७ यत्समवेतं कार्यं भवति ज्ञेयं तु समवायि तत् तत्रास

हेतुत्वं २ जनकं १

त्वंजनकंद्वितीयमाभास्यापरंतृतीयंस्यात् १८ येनसहपूर्वभा
वः कारणमादायवायस्य अन्यंप्रतिपूर्वभावेज्ञातेयत्पूर्वभा
वविज्ञानं १९ जनकंप्रतिपूर्ववर्त्तितामपरिज्ञायनयस्यगृह्यते
अतिरिक्तमथापियद्भवेन्नियतावश्यकपूर्वभाविनः २० एतेपंचा
न्यथासिद्धादंडत्वादिकमादिमं घटादौदंडरूपादिद्वितीयमपिद
र्शितं २१ तृतीयंतुभवेद्व्योमकुलालजनकोपरः पंचमोरासभा
दिःस्यादेतेष्वावश्यकस्त्वसौ २२ समवायिकारणत्वंद्रव्यस्येव
तिविज्ञेयं गुणकर्ममात्रवृत्तिज्ञेयाप्यसमवायिहेतुत्वं २३ अन्य
त्रनित्यद्रव्येभ्यआश्रितत्वमिहोच्यते क्षित्यादीनांनवानांतुद्रव्य
त्वंगुणयोगिता २४ क्षितिर्जलंतथातेजःपवनोमनएवच परा
परत्वमूर्त्तत्वक्रियावेगाश्रयाअमी २५ कालखात्मदिशांस
र्वगतत्वंपरमंमहत् क्षित्यादिपंचभूतानिचत्वारिस्पर्शवंतिहि

लेयम ५

२६ द्रुत्वादं च चक्षुषस्याददृष्टाकाशशरीरिणां अव्याप्यवृत्तिःस्
१ णिको विशेषगुण इष्यते २७ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथ
मास्त्रयः गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः २८ आत्मानो
भूतवर्गाश्च विशेषगुणयोगिनः यदुक्तं यस्य साधर्म्यं वैधर्म्यमि
स्पर्शा४ तरस्य तत २९ द्योष्टौ वेगाख्यसंस्कारो मरुतां गुणाः स्प
र्शाद्यष्टौ रूपवेगौ द्रुवत्वं तेजसो गुणाः ३० स्पर्शाद्योष्टौ वेग
श्च द्रुवत्वं च गुरुत्वकं रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश
३१ स्नेहहीना गंधयुक्ताः क्षितावेते चतुर्दश बुध्यादिषट्कं
संख्यादिपंचकं भावना तथा ३२ धर्माधर्मौ गुणा एते आत्म
स्युश्च नः तुर्दश संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे ३३
संख्यादयः पंच बुद्धिरिच्छा यत्नोपि चेश्वरे परापरत्वे संख्यादि
पंच वेगश्च मानसे ३४ तत्र क्षितिर्गंधहेतुर्नानारूपवती मता २

श्री

इंद्रियंविषयस्तथा॥३७॥योनिजादिर्भवेद्देहइं ४ द्वेधा

षड्विधस्तुरसस्तत्र गंधस्तु द्विविधो मतः ३५ स्पर्शस्तस्यास्तु
विज्ञेयो ह्यनुष्णाशीतपाकजः नित्यानित्या च सा [illegible] नित्या
स्यादणुलक्षणा ३६ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी
सा च त्रिधा भवेद्देह [illegible] इंद्रियं घ्राणलक्षणं विषयो द्व्यणुकादिस्तु
ब्रह्मांडांतमुदाहृतः ३८ वर्णः शुक्लो रसस्पर्शौ जले मधुरशीत
लौ स्नेहस्तत्र द्रवत्वं [illegible] सांसिद्धिकमुदाहृतं ३८ नित्यतादि प्र
थमव [illegible] देहमयोनिजं इंद्रियं रसनं सिंधुर्हिमादिर्विषयो मतः
३९ स्पर्शोष्णस्तेजसस्तु स्याद्रूपं शुक्लं भास्वरं नैमित्तिकं द्रवत्वं
तु नित्यतादि च पूर्ववत् ४० इंद्रियं नयनं वह्निः स्वर्णादिर्विषयो
मतः अपाकजोनुष्णाशीतः स्पर्शस्तु पवने मतः ४१ तिर्यग्ग
मनवानेष ज्ञेयः स्पर्शादिलिंगकः पूर्ववन्नित्यताद्युक्तं देहव्या
पि त्वगिंद्रियं ४२ प्राणादिस्तु महावायुपर्यंतो विषयो मतः

तु

किंतु

जन्यानांजनकःकालो २

3

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ४४ इन्द्रियं तु भ
वेत् श्रोत्रमेकः सन्नप्युपाधितः [redacted] जगतामा
श्रयो मतः ४५ परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः दूरां
तिकादिधीहेतुरेका नित्या दिगुच्यते ४६ उपाधिभेदादेकोपि
प्राच्यादिव्यपदेशभाक् आत्मेन्द्रियाद्यधिष्ठाता करणं हि सक
र्तृकं ४७ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः तथात्वं चेदि
न्द्रियाणामुपघाते कथं स्मृतिः ४८ मनोपि न तथा ज्ञानाद्यन
ध्यक्षं तदा भवेत् धर्माधर्माश्रयोध्यक्षो विशेषगुणयोगतः ४
९ प्रवृत्त्याद्यनुमेयोयं रथगत्येव सारथिः अहंकारस्याश्रयो
यं [redacted] गोचरः ५० विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु
द्विविधा मता अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा
५१ प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे घ्राणजादिप्र २

मनोमात्रस्य २

भेदेनप्रत्यक्षंषड्विधंमतं ५२ घ्राणस्यगोचरोगंधोगंधत्वा
दिरपिस्मृतः तथारसोरसज्ञायास्तथाशब्दोपिचश्रुतेः ५३
उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वंतिपृथक्त्वसंख्ये वि
भागसंयोगपरापरत्वस्नेहद्रवत्वंपरिमाणयुक्तं ५४ क्रि
याजातियोग्यवृत्तिःसमवायश्चतादृशः गृह्णातिचक्षुःसंबं
धादालोकोद्भूतरूपयोः ५५ उद्भूतस्पर्शवद्द्रव्यंगोचरःसो
पिचत्वचः रूपान्यच्चक्षुषोयोग्यंरूपमत्रापिकारणं ५६ द्रव्या
ध्यक्षेत्वचोयोगोमनसाज्ञानकारणं मनोग्राह्यंसुखंदुःख
मिच्छाद्वेषोमतिःकृतिः ५७ ज्ञानंयन्निर्विकल्पाख्यंतदतींद्रिय
मिष्यते महत्वंषड्विधेहेतुरिंद्रियंकरणंमतं ५८ विषयेंद्रिय
संबंधोव्यापारःसोपिषड्विधः द्रव्यग्रहस्तुसंयोगात्संयुक्तसम
वायतः ५९ द्रव्येषुसमवेतानांतथातत्समवायतः तत्रा

त्विसमवेतानांनाशस्य समवायतः ६० तद्वृत्तीनांसमवेतसमवा
येनतुग्रहः विशेषणतयातद्वदभावानांग्रहोभवेत् ६१ यदिस्या
दुपलभ्येतेत्येवंयत्रप्रसज्यते प्रत्यक्षंसमवायस्यविशेषणतया
भवेत् ६२ अलौकिकस्तुव्यापारस्त्रिविधः परिकीर्तितः सामा
न्यलक्षणोज्ञानलक्षणोयोगजस्तथा ६३ आसत्तिराश्रयाणांतु
सामान्यज्ञानमिष्यते तदिंद्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ६४
यस्य विषयीतस्यैवव्यापारोज्ञानलक्षणः योगजोद्विविधःप्रोक्तोयु
क्तयुंजानभेदतः ६५ युक्तस्यसर्वदाभानंचिंतासहकृतोपरः
व्यापारस्तुपरामर्शः करणंव्याप्तिधीर्भवेत् ६६ अनुमायांज्ञानमा
नेलिंगंतुकरणंनहि अनागतादिलिंगेनंस्यादनुमितिस्तथा ६७
व्याप्यस्यपक्षवृत्तित्वधीःपरामर्शउच्यते व्याप्तिःसाध्यवदन्य
स्मिन्नसंबंधउदाहृतः ६८ अथवाहेतुमन्निष्ठविरहाप्रतियो ४

गिना साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते ६९ सिषाधयि
षाभ्रन्या सिद्धिर्यत्र न तिष्ठति सपक्षस्तत्र हेतूनितज्ञानादनुमि
त्तिर्नवेत् ७० अनैकान्तिकविरुद्धश्चाप्यसिद्धः प्रतिपक्षितः का
लात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा ७१ आद्यः साधारण
स्तु स्यादसाधारणकोऽपरः तथैवानुपसंहारी त्रिधानैकान्तिको भ
वेत् ७२ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः यस्तूभयस्मा
द्व्यावृत्तः स त्वसाधारणो मतः ७३ तथैवानुपसंहारी केवलान्व
यिपक्षकः यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ७४ आश्र
यासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ व्याप्यत्वासिद्धिरपरा स्या
६२ दसिद्धिरतस्त्रिधा ७५ पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः
ह्रदो द्रव्यं धूमवत्वादत्रासिद्धिरथापरा ७६ व्याप्यत्वासिद्धिरप

प

रानीलधूमादिकेन्ववैत् विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्ष
ता ७७ साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः उत्पत्तिका
लिकघटे गंधादिर्यत्र साध्यते ७८ ग्रामीणस्य प्रथमतः पश्य
तो गवयादिकं सादृश्यधीर्गवादीनां या स्यात्सा करणं मतं ७९
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते गवयादिपदानां
तु शक्तिधीरुपमाफलं ८० पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ८१ लक्षणा शक्य
संबंधस्तात्पर्यानुपपत्तितः आसत्तियोग्यताकांक्षातात्पर्यज्ञान
मिष्यते ८२ कारणं सन्निधानं तु पदस्यासत्तिरिष्यते पदार्थे त
त्र तद्वत्ता योग्यता परिकीर्तिता ८३ यत्पदेन विना यस्यानन्वयानुभा
वकता भवेत् आकांक्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितं ८४

साक्षात्कारेसुखादीनांकरणंमनउच्यते अयौगपद्याज्ज्ञाना
नां तस्याणुत्वमिहेष्यते ८५ अथद्रव्याश्रिताज्ञेयानिर्गुणा
निष्क्रियागुणाः रूपंरसस्पर्शगंधौपरत्वमपरत्वकं ८६ द्रवत्व
स्नेहवेगाश्चमनामूर्त्तगुणाअमी धर्माधर्मौभावनाचशब्दोबुद्ध्या
दयोपिच ८७ एतेमूर्त्तगुणाःसर्वेविद्वद्भिःपरिकीर्त्तिताः संख्या
दिश्चविभागांतउभयेषांगुणामताः ८८ संयोगश्चविभागश्च
संख्याद्वित्वादिकामता द्विपृथक्त्वादयस्तद्वदेतेनेकाश्रिता
गुणाः ८९ अतःशेषगुणाःसर्वेमताएकैकवृत्तयः बुद्ध्यादि
षट्कंस्पर्शांताःस्नेहःसांसिद्धिकोद्रवः ९० अदृष्टभावनाशब्दा
अमीवैशेषिकागुणाः संख्यादिरपरत्वांतोद्रवोनैमित्तिकस्तथा
९१ गुरुत्ववेगौसामान्यगुणाएतेप्रकीर्त्तिताः संख्यादिरपरत्वांता

मता २

द्रुवत्वंस्नेहएवच ९२ एतेतुद्वींद्रियग्राह्याअथस्पर्शांतशब्दा
द्काः बाह्यैकैकेंद्रियग्राह्यागुरुत्वादृष्टभावनाः ९३ अतीं
द्रियाविभू नांतुयेस्युर्वैशेषिकागुणाः अकारणगुणोत्पन्ना
एतेषुपरिकीर्तिताः ९४ अपाकजास्तुस्पर्शांताद्रवत्वंचतथा
विधं स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकं ९५ स्थितिस्था
पकमप्येतेस्युः कारणगुणोद्भवाः संयोगश्चविभागश्चवेगश्चैते
तुकर्मजाः ९६ स्पर्शांतपरिमाणैकपृथक्त्वस्नेहशब्दकेभवे
दसमवायित्वमथवैशेषिकेगुणे ९७ आत्मनस्यान्निमित्तत्वमु
ष्णस्पर्शगुरुत्वयोः वेगेपिचद्रवत्वेचसंयोगादिद्वये तथा ९८
द्विधैवकारणत्वंस्यादथप्रादेशिकोभवेत् विशेषिकोविभुगु
णः संयोगादिद्वयेतथा ९९ चक्षुर्ग्राह्यंभवेद्रूपंद्रव्यादेरुपलं

नकं चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा १०० जलादि
परमाणौ तु नित्यमन्यस्य हेतुकं रसस्तु रसनाग्राह्यो मधुरादिरने
२३ कधा १०१ सहकारी रसनायास्तु नित्यतादि च पूर्ववत् घ्राणग्रा
ह्यो भवेद् गन्धो घ्राणस्यैवोपकारकः २ सौरभं चासौरभं च स द्विधा
परिकीर्तितः स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ३ अनु
ष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः काठिन्यादिः क्षितावेव
नित्यतादि च पूर्ववत् ४ एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्र
चित् तत्रापि परमाणौ स्यात् पाको वैशेषिके मते ५ नैयायिका
नां तु नैवं द्व्यणुकादावपीष्यते गणनव्यवहारे तु हेतुः संख्याभि
धीयते ६ नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते द्वित्वादयः
परार्द्धान्ता अपेक्षाबुद्धिजा मताः ७ अनेकाश्रयपर्याप्ता एते तु प
रिकीर्तिताः अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः ८ अने

केकत्वबुद्धिर्यासापेक्षाबुद्धिरुच्यते परिमाणं भवेन्मानव्यवहा
रस्य कारणं ९ अणुदीर्घं महद्ध्रस्वमिति तद्भेद ईरितः अनि
त्यं तदनित्यं स्यान्नित्ये नित्यं तदिष्यते १० संख्यातः परिमा
णाच्च प्रचयादपि जायते अनित्यं द्व्यणुकादौ तु संख्याजन्यमु
दाहृतं ११ परिमाणं घटादौ तु परिमाणजमुच्यते प्रचयः शि
ख्योध थिलासौयः संयोगस्तेन जन्यते १२ परिमाणं तूलकादौ ना
शस्त्वाश्रयनाशतः १३ संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्यय
कारणं अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते १४ अ
स्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा अप्राप्तयोस्तु या
प्राप्तिः सैव संयोग ईरितः १५ कीर्तितस्त्रिविधस्त्वेष आद्यो
न्यतरकर्मजः तथान्ययस्पंदजन्मा भवेत्संयोगजोऽपरः १६ ७
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः अभिघातो नोदनं

वनाशे हेतुरिहादिमः नाशो हेतुर्द्वितीयस्याद्विनाशोपि त्रिधा भ
वेत् ९ एककर्मोद्भवैः स्याद्द्व्यकर्मजो वापरः द्विनाशजस्तृतीय
स्यात् तृतीयोपि द्विधा भवेत् १८ हेतुमात्रविनाशोत्थो हेतुहेतुवि
नाशजः परत्वंचापरत्वंच द्विविधं परिकीर्त्तितं १९ दैशिकं कालि
कं कालिकं चापि मूर्त्त एव तु दैशिकं परत्वं सूर्यसंयोगभूयस्त्व
ज्ञानतो भवेत् २० अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितं तयो
रसमवायी तु दिक्संयोगस्तदाश्रये २१ दिवाकरपरिस्पन्द
भूयस्त्वज्ञानतो भवेत् परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः २२
अत्र त्वसमवायी स्यात्संयोगः कालपिंडयोः अपेक्षाबुद्धिनाशेन
नाशस्तेषां मुदाहृतः २३ बुद्धेः प्रपंचः प्रागेव प्रायशो विनिरूपि
तः अथावशिष्टोप्यपरः प्रकारः परिदृश्यते २४ अप्रमा च प्रमा
चेति ज्ञानं द्विविधमिष्यते तच्छून्ये तन्मतिर्या स्यादप्रमासा निरूपि

८ ता २५ तत्स्वप्नेऽपिपर्यासः संशयोपिप्रकीर्त्तितः आद्योदेहेष्वात्मस
बुद्धिः शंखादौपीततामतिः २६ नवेनिश्चयरूपायासंशयोथ
प्रदर्श्यते किंस्विन्नरोवास्थाणुर्वेत्यादिबुद्धिस्तुसंशयः २७ तद
न्नावाप्रकाराधीस्तत्प्रकारानुनिर्णयः ससंशयोमतिर्यास्यादे
कत्राभावभावयोः २८ साधारणादिधर्मस्यज्ञानंसंशयकारणं
दोषोऽप्रमायाजनकः प्रमायास्तुगुणोभवेत् २९ पित्तदूरत्वादि
रूपोदोषोनानाविधोमतः प्रत्यक्षेतुविशेष्येणविशेषणवतासम
मं ३० सन्निकर्षोगुणस्तुस्यादथत्वनुमितौपुनः पक्षेसाध्यव
द्विशिष्टेतुपरामर्शोगुणोभवेत् ३१ शक्येसादृश्यबुद्धिस्तुभवेदुप
मितौगुणः शाब्दबोधेयोग्यतायास्तात्पर्यस्याथवाप्रमा ३२ गुणः ८
स्याद्भ्रमभिन्नंतुज्ञानमत्रोच्यतेप्रमा अथवातत्प्रकारंयज्ज्ञानं

तद्वद्विशेष्यकं ३३ तत्त्वमानत्प्रमाणापि न भ्रमः स्यान्निर्विकल्पकं
प्रकारतादिशून्यं हि संबंधानवगाहि तत् ३४ प्रमात्वं न स्वतो
ग्राह्यं संशयानुपपत्तितः व्यभिचारस्याग्रहोपि सहचारग्रहस्त
था ३५ हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छंकानिवर्त्तकः साध्यस्य
व्यापको यस्तु हेतोरव्यापकस्तथा ३६ स उपाधिर्भवेत्तस्य नि
ष्कर्षोयं प्रदर्श्यते सर्वे साध्यसमानाधिकरणास्स्युरुपाधयः ३७
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता व्यभिचारस्यानु
मानमुपाधेस्तु प्रयोजनं ३८ शब्दोपमानयोर्नैव पृथक्प्रामा
ण्यमिष्यते अनुमानगतार्थत्वादिति वैशेषिकं मतं ३९ तन्न
प सम्यक् विना व्याप्तिबोधं शाब्दादिबोधतः द्वैविध्यं तु न वैधर्म्ये
रन्वयव्यतिरेकतः ४० अन्वयव्याप्तिरुक्तैव व्यतिरेकादयोच्य

ते साध्यत्वावच्छेदकत्वं इहत्वं नावस्य यद्भवेत् ॥४१॥ अथापि त्रैस्तु
नैवेह प्रमाणं न रते ष्यते व्यतिरेकव्याप्तिबुद्ध्यावरितार्थाहिसाय
तः ॥४२॥ सुखं तु जगतामेव काम्यं धर्मेण जन्यते अधर्मजन्यं दुःखं
१ स्यात्प्रतिकूलं सचेतसां ॥४३॥ निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव
जायते इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥४४॥ चिकीर्षा कृ
तिसाध्यत्वप्रकारेच्छा तु या भवेत् तद्धेतुः कृतिसाध्येष्टसाधनत्व
मतिर्भवेत् ॥४५॥ बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका तद्धेतुत्व
बुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥४६॥ द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य का
रणं प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणं ॥४७॥ एवं प्रयत्नत्रैवि
ध्यं तान्त्रिकैः परिकीर्तितं । चिकीर्षा कृति[illegible]साध्येष्टसाधनत्वमति
स्तथा ॥४८॥ उपादानस्य साध्यस्य प्रत्यक्षं जनकं भवेत् निवृत्तिस्तु

।भवेद्वेषाद्द्विष्टसाधनताधियः ४९ यत्नोजीवनयोनिस्तुसर्वदा
तींद्रियोभवेत् शरीरेप्राणसंचारेकारणंसंप्रकीर्तितः ५० अती
द्रियंगुरुत्वंस्यात्पृथिव्यादिद्वयेतथा अनित्येतदनित्यंस्यान्नित्येनि
त्यमुदाहृतं ५१ तदेवासमवायिस्यात्पतनाख्येतुकर्मणि सांसि
द्धिकंद्रवत्वंस्यान्नैमित्तिकमथापरं ५२ सांसिद्धिकंतुसलिलेद्विति
यंक्षितितेजसोः परमाणौजलेनित्यमन्यत्रानित्यमिष्यते ५३ नैमि
त्तिकंवह्नियोगात्तपनीयघृतादिषु द्रवत्वंस्यंदनेहेतुर्निमित्तंसंग्रहे
तुतत् ५४ स्नेहोजलेसनित्योणावनित्योवयविन्यसौ तैलांतरेतत्प्र
कर्षाद्दहनस्यानुकूलता ५५ संस्कारभेदोवेगोथस्थितिस्थापक
भावने मूर्तमात्रेतुवेगःस्यात् कर्मजोवेगजःक्वचित् ५६ स्थितिस्था
पकसंस्कारःक्षितौकेचिच्चतुर्ष्वपि अतीद्रियंतद्विज्ञेयःक्वचित्स्पंदेपिका

रणं ५७ भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियं उपेक्षाना
त्मकस्तस्य निश्चयः कारणं भवेत ५८ स्मरणे प्रत्यभिज्ञायामप्यसौ
हेतुरुच्यते । धर्माधर्मा [illegible] दृष्टं स्यात धर्मः स्वर्गादिसाधनं ५९ गंगास्ना
नादियागादिव्यापारः स तु कीर्त्तितः कर्मनाशाजलस्पर्शादिनाना
श्यस्त्वसौ मतः ६० अधर्मो नरकादिनां हेतुर्निदितकर्मजः प्रायश्चि
त्तादिनाश्योसौ जीववृत्तिरिमौ गुणौ ६१ इमौ तु वासनाजन्यौ ज्ञाना
दपि विनश्यतः शब्दो ध्वनिश्च वर्णश्च मृदंगादिभवो ध्वनिः ६२ कं
ठसंयोगादिजन्मा वर्णास्ते कादयो मताः सर्वः शब्दो नभोवृत्तिः श्रोत्रो
त्पन्नस्तु गृह्यते ६३ वीचितरंगन्यायेन तदुत्पत्तिस्तु कीर्त्तिता; कदं
बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ६४ उत्पन्नः को विनष्टः क इ
ति बुद्धेरनित्यता सोयं क इति बुद्धिस्तु साजात्यमवलंबते ६५ तदे १९
वौषधमित्यादौ सजातीयेपि दर्शनात तस्मादनित्या एवेति वर्णाः स
र्वे मतं हि नः ६६ इति श्री [illegible] चाननभट्टाचार्यवि
रचितो भाषापरिछेदः ॥